योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०८७

सप्ताशीतितमः सर्गः ८७

भानुरुवाच ।

पितामहक्रमे तस्मिंस्ततस्ते बहुभावनात् ।

कर्मभिस्तैः समाक्रान्तमनस्कास्तस्थुरादृताः ।। १

यावत्ते देहकास्तेषां तापेन पवनैस्तथा ।

कालेन शोषमभ्येत्य गलिताः शीर्णपर्णवत् ।। २

जक्षुस्तान्देहकांस्तत्र क्रव्यादा वनवासिनः ।

इतश्चेतश्च लुठितान्सुफलानीव मर्कटाः ।। ३

अथ ते शान्तबाह्यार्था ब्रह्मत्वे कृतभावनाः ।

तस्थुश्चतुर्युगस्यान्ते यावत्कल्पः क्षयं गतः ।। ४

क्षीयमाणे ततः कल्पे तपत्यादित्यसंचये ।

पुष्करावर्तकेषूच्चैर्वर्षत्सु कठिनारवम् ।। ५

वहत्सु कल्पवातेषु स्थित एकमहार्णवे ।

क्षीणेषु भूतवृन्देषु ते तथैव व्यवस्थिताः ।। ६

ततो रात्रिक्रमपरे सर्वां संहृत्य तां स्थितिम् ।

स्थिते त्वय्यात्मनि विभो ते तथैव व्यवस्थिताः ।। ७

अद्य प्रबुद्धे भवति स्रष्टुमिच्छति संसृतिम् ।

सुखेनैव क्रमेणोच्चैस्ते तथैव व्यवस्थिताः ।। ८

तथैते भगवन्ब्रह्मन्ब्रह्मणो ब्राह्मणा दश ।

त एते दश संसारा मनोव्योमनि संस्थिताः ।। ९

तेषामेकतमस्याहमयमाकाशमन्दिरे ।

भानुर्भुवि विभो कालकलाकर्मणि योजितः ।। १०

एष ते कथितः सर्गो दिशानामलसंभव ।

ब्रह्मणां संभवो व्योम्नि यथेच्छसि तथा कुरु ।। ११

विविधकल्पनया वलिताम्बरं

यदिदमुत्तम जागतमुत्थितम् ।

करणजालकमाहितमोहनं

तदखिलं निजचेतसि विभ्रमः ।। १२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० उ० ऐन्दवो० दशजगद्वर्णनं नाम सप्ताशीतितमः सर्गः ।। ८७ ।।